चित्रकः। व्याघ्रः। इति राजनिर्घण्टः॥ (यथा, रामायणे। २।६४।७।
"नागान्गगणैर्द्वीपिलरक्षुद्रगणैर्द्रुतः॥")

द्वीप्यः, त्रि, द्वीपे भव इत्यर्थे यत्प्रत्ययः॥ ("तत्र भवः।" ४।३।५३। इति यत्।) द्वैप्यः। (यथा, वाजसनेयसंहितायाम्। १६।३१।
"नमो नादेयाय च द्वीप्याय च॥")

द्वृ, स्वगने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) वकारोपधः। द्वरति। स्वगनं संवरणम्। वरणे इति प्राञ्चः। वरणं स्वीकारः स्वगनञ्चेति गोविन्दभट्टः। इति दुर्गादासः॥

द्वेधा, अ, (द्वि+"संख्याया विधार्थे धा।" ५।३।४२। इति धा। "एधाच्च।" ५।३।४५। इति तस्य एधाच्।) द्विप्रकारम्। इति व्याकरणम्॥

द्वेषः, पुं, (द्विष+भावे घञ्।) शत्रुता। तत्पर्य्यायः। वैरम् २ विरोधः ३ विद्वेषः ४ द्वेषणम् ५। इति शब्दरत्नावली॥ (यथा, मनुः। ४। १६३।
"नास्तिक्यं वेदनिन्दाञ्च देवतानाञ्च कुत्सनम्। द्वेषं दम्भञ्च मानञ्च क्रोधं तैक्ष्ण्यञ्च वर्ज्जयेत्॥")
अस्य कारणं द्विष्टसाधनताज्ञानम्। इति भाषापरिच्छेदः॥ स च आत्मनो विशेषगुणः। इति सिद्धान्तमुक्तावली॥ तद्गुणवर्त्तित्वनिषेधो यथा, श्रीभगवद्गीतायाम्। ३। ३४।
"इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ। तयोर्न वशमागच्छेत् तौ ह्यस्य परिपन्थिनौ॥"
"इन्द्रियस्येन्द्रियस्येति वीप्सया सर्व्वेषामिन्द्रियाणां प्रत्येकमित्युक्तम्। अर्थे स्वस्वविषये अनुकूले रागः प्रतिकूले द्वेषः इत्येवं रागद्वेषौ व्यवस्थितौ अवश्यम्भाविनौ।" इति तट्टीकायां श्रीधरस्वामी॥

द्वेषणं, क्ली, (द्विष+भावे ल्युट्।) द्वेषः। इति शब्दरत्नावली॥ (यथा, महाभारते।५।६१।२७।
"अकस्मादेव पार्थानां द्वेषणं नोपपद्यते॥")

द्वेषणः, त्रि, (द्विष+"क्रुधमण्डार्थेभ्यश्च।" ३।२।१५१। इति युच्।) शत्रुः। इत्यमरः। ३।१।९०॥ (यथा, महाभारते।१२।१६८।१५।
"पापपो द्वेषणः क्रोधी निर्घृणः परुषस्तथा॥")

द्वेषी, [न्] त्रि, (द्वेष्टि तच्छीलः। द्विष+"संपृचानुरुधेति।" ३।२।१४२। इति घिनुण्।) शत्रुः। इति हेमचन्द्रः। ३।३९३॥ (यथा, रघुः। १७।७३।
"तथापि ववृधे तस्य तत्कारिद्वेषिणो यशः॥")

द्वेष्टा, [ऋ] त्रि, (द्वेष्टीति। द्विष+तृच्।) विद्वेषकर्त्ता। इति द्विषधातोस्तृन्प्रत्ययेन साध्यः॥ (यथा, महाभारते। १। ४६। ६।
"द्वेष्टारस्तस्य नैवासन् स च द्वेष्टि न कञ्चन॥")

द्वेष्यः, त्रि, (द्वेष्टुमर्हः। यत्।) द्वेषविषयः। विद्वेषार्हः। तत्पर्य्यायः। अक्षिगतः २। इत्यमरः। ३।१।४५॥ (यथा, महाभारते। ४।१६।१८।
"सुखं वा यदि वा दुःखं द्वेष्यं वा यदि वा प्रियम्।
यथावत् सर्व्वमाचष्ट श्रुत्वा धास्यामि यत्क्षमम्॥"
द्विषतेऽसाविति। द्विष+ण्यत्। शत्रुः। यथा, रघुः। १। २८।
"द्वेष्योऽपि सम्मतः शिष्टस्तस्यार्त्तस्य यथौषधम्। त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता॥")

द्वैगुणिकः, त्रि, (द्विगुणार्थं दत्तं द्विगुणम्। तत् प्रयच्छति द्विगुणं ग्रहीतुमेकगुणं ददातीत्यर्थः। द्विगुण+"प्रयच्छति गर्ह्यम्।" ४।४।३०। इति ठक्।) वृद्ध्याजीवः। इति हेमचन्द्रः। ३।५४४॥ द्विगुणं गृह्णाति यः इत्यर्थे ष्णिकप्रत्ययः॥

द्वैतं, क्ली, (द्विधा इतं द्वीतम्। तस्य भावः। युवादित्वात् अण्। स्वार्थे अण् वा।) द्वयम्। इति हेमचन्द्रः।६।६०॥ (यथा, भागवते।९।१५।३०।
"विशोको ब्रह्मसम्पत्त्या संछिन्नद्वैतसंशयः। लीनप्रकृतिनैर्गुण्यादलिङ्गत्वादसम्भवः॥")
लोकादिरूपम्। एकायनोऽसाविति श्लोकव्याख्यायां श्रीधरस्वामी॥ (वनविशेषः॥ गतद्वैते, त्रि। यथा, किराते। १। १।
"सवर्णिलिङ्गी विदितः समाययौ
युधिष्ठिरं द्वैतवने वनेचरः॥"
"द्वैतवने द्वैताख्ये तपोवने। यद्वा, द्वे इते गते यस्मात् तत् द्वीतम्। द्वीतमेव द्वैतं तच्च तद्वनञ्चेति तस्मिन्। शोकमोहादिरहिते इत्यर्थः॥" इति तट्टीकायां मल्लिनाथः॥)

द्वैतवादी, [न्] त्रि, (द्वैतं जीव ईश्वरश्चेति द्वयं वदतीति। वद+णिनिः।) जीवेश्वरयोर्भेदवादी। ईश्वरातिरिक्तजीववक्ता। तस्य मतं यथा, परमात्मनो जीवात्मा पृथक् तन्मध्ये केषाञ्चिन्मते प्रकृतिरतिरिक्ता केषाञ्चिन्मते प्रकृतिरदृष्टमात्रे पर्य्यवसिता एवं जीवश्च पृथक्। अत्र प्रमाणम्।
जन्मकर्म्ममरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च। पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्य्ययाच्चैव॥
इति साङ्ख्यमतम्॥
तत्रेश्वरः सर्व्वज्ञः परमात्मा एक एव। जीवः प्रतिशरीरं भिन्नः विभुर्नित्यश्च। इति गोतममतम्॥
इह ब्रह्मणो जीवेतरत्वप्रतिपादनात् तयोरद्वैतं नाभिमतम्। नेतरोऽनुपपत्तेर्भेदव्यपदेशाच्च सूक्ष्मोऽप्यस्य व्यपदेशादाकाशोऽर्थान्तरत्वादिव्यपदेशाद्भोगमात्रसाम्यलिङ्गाच्चेति सूत्रैर्मोक्षेऽपि तयोर्द्वैतनिरूपणाच्च। इति गोविन्दभाष्यमतम्॥
यतो द्वैतमते युक्तिरेव प्रमाणं मुक्त्वा यत् फलति तदेव सर्व्वाध्यात्मविद्याप्रतिपादकश्रुतीनां तात्पर्य्यम्। इति रामानुजमतञ्च॥

द्वैतीयीकः, त्रि, (द्वितीय+तीयादीकक्। स्वार्थे वा ईकक्।) द्वितीयः। यथा,—
"द्वैतीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महाकाव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः॥"
इति नैषधम्। २। ११०॥

द्वैधं, अ, (द्वि+"संख्याया विधार्थे धा।" ५।३।४२। इति धा। "द्वित्र्योश्च धमुञ्।" ५।३।४५। इति धा इत्यस्य धमुञ्।) द्विप्रकारम्। इति व्याकरणम्॥ (यथा, हरिवंशे। १। ३०।
"तदण्डमकरोद्द्वैधं दिवं भुवमथापि च॥"
क्ली, "धमुञन्तात् स्वार्थे डदर्शनम्।" इति वार्त्तिकोक्त्या ड।) राज्ञां षड्गुणानामन्यतमः। इत्यमरः। २।८।१८॥) एकेन सन्धिरपरेण विग्रहः इति द्वौ प्रकारौ द्वैधं निपातितम्। इत्यमरटीकायां भरतः॥ (तच्च द्विविधम्। यथा, मनुः। ७। १६७।
"बलस्य स्वामिनश्चैव स्थितिः कार्य्यार्थसिद्धये। द्विविधं कीर्त्त्यते द्वैधं षाड्गुण्यगुणवेदिभिः॥")
विवादः। इति त्रिकाण्डशेषः॥ (द्विप्रकारम्। यथा, मनुः। ८। ७३।
"बहुत्वं परिगृह्णीयात् साक्षिद्वैधे नराधिपः। समेषु तु गुणोत्कृष्टान् गुणिद्वैधे द्विजोत्तमान्॥"
त्रि। यथा, "पथि द्वैधानि वृत्तानि।" इति सिद्धान्तकौमुदी॥)

द्वैपः, पुं, (द्वीपिनो विकारः द्वैपम्। द्वीप+"प्राणिरजतादिभ्योऽञ्।" ४।३।१५४। इति अञ्। तेन परिवृतः। "द्वैपवैयाघ्रादञ्।" ४।२।१२। इत्यञ्।) द्वीपिचर्म्मावृतरथः। इत्यमरः। २।८।५३॥ द्वीपसम्बन्धिनि व्याघ्रचर्म्मसम्बन्धिनि च त्रि॥ (यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये।
"द्वैपं दग्धं चर्म्म मातङ्गजं वा
भिन्ने स्फोटे तैलयुक्तं प्रलेपः॥")

द्वैपायनः, पुं, (द्वीपं अयनं उत्पत्तिस्थानं यस्य। स एव। स्वार्थे प्रज्ञादित्वात् वा अण्।) व्यासः। इति हेमचन्द्रः। ३। ५११॥ (सनिरुक्तिरस्य जन्मकथा यथा महाभारते।१।६३।८३—८५।
"इति सत्यवती हृष्टा लब्ध्वा वरमनुत्तमम्। पराशरेण संयुक्ता सद्यो गर्भं सुषाव सा॥
जज्ञे च यमुनाद्वीपे पाराशर्य्यः स वीर्य्यवान्। स मातरमनुज्ञाप्य तपस्येव मनो दधे॥
स्मृतोऽहं दर्शयिष्यामि कृत्येष्विति च सोऽब्रवीत्॥
एवं द्वैपायनो जज्ञे सत्यवत्यां पराशरात्। न्यस्तो द्वीपे स यद्बालस्तस्माद्द्वैपायनः स्मृतः॥"
ह्रदविशेषः। अत्र दुर्योधनः पाण्डवभयात् आत्मानं स्तम्भयित्वा स्थितः। यथा, महाभारते। ९। ३१। २।
"आसाद्य च कुरुश्रेष्ठ! तदा द्वैपायनं ह्रदम्। स्तम्भितं धार्त्तराष्ट्रेण दृष्ट्वा तं सलिलाशयम्। वासुदेवमिदं वाक्यमब्रवीत् कुरुनन्दनः॥")

द्वैप्यं, त्रि, (द्वीपे भवम् द्वीपस्य इदम् वा। द्वीप+"द्वीपादनुसमुद्रं यञ्।" ४।३।१०। इति यञ्।) द्वीपसम्बन्धि। द्वीपशब्दात् इदमर्थे